# Shri Nrisimhastavarajah

# શ્રીનૃસિંહસ્તવરાજઃ

## Document Information

Text title : nRRisiMhastavarAjaH

File name : nRRisiMhastavarAjaH.itx

Category : vishhnu, dashAvatAra, stavarAja

Location : doc_vishhnu

Transliterated by : NA

Proofread by : NA

Latest update : February 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 10, 2024

*sanskritdocuments.org*

# શ્રીનૃસિંહસ્તવરાજઃ

શ્રીગણેશાય નમઃ ।
શ્રીલક્ષ્મીનૃસિંહગુરવે નમઃ ।
ૐ અસ્ય શ્રીનૃસિંહસ્તવરાજસ્તોત્રમન્ત્રસ્ય મહેશ્વર ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીલક્ષ્મીનૃસિંહો દેવતા ।
મમ સર્વાભીષ્ટસિધ્યર્થે જપે વિનિયોગઃ ॥

ધ્યનમ્ -
કર્પૂરધામધવલં કટકાં ગદાદિ-
છત્રત્રિનેત્રશશિશેખરમણ્ડિતાસ્યમ્ ।
વામાઙ્ગસંશ્રિતરમાનયનાભિરામ-
મબ્જાક્ષશઙ્ખસગદાં નૃહરિં નમામિ ॥

ૐકારમમૃતં બ્રહ્મ નૃસિંહમક્ષરં પરમ્ ।
યદ્રૂપં પરમં જ્ઞેયં તં નમામિ હરિં પરં ॥ ૧॥

ઉગ્રમૂર્તિં મહામૂર્તિં જ્ઞાનગમ્યં નિરઞ્જનમ્ ।
અકારાદ્યક્ષરાઃ સર્વે તં દેવં પ્રણમામ્યહમ્ ॥ ૨॥

લોકપ્રિયં લોકગુરું લોકેશં પરમં પદમ્ ।
સકલં નિષ્કલં નિત્યં નિત્યાનિત્યં નમામ્યહમ્ ॥ ૩॥

જ્વાલાકરાલમૃત્યુગ્રં મૃગવક્ત્રમનામયમ્ ।
સ્વરૂપં શ્રીસમાયુક્તં યોગગમ્યં નમામ્યહમ્ ॥ ૪॥

પરં જ્યોતિઃ પરં ધામ પરમાનન્દવિગ્રહમ્ ।
શુક્તિકર્ણં પરં ધ્યેયં તં નમામિ હરિં પરમ્ ॥ ૫॥

ઈશ્વર ઉવાચ ।
મમાત્મા પ્રાણશક્તિસ્ત્વં મત્પ્રિયં મદ્ગુરું પરમ્ ।
મમાનન્દકરં શ્રેષ્ઠં નારસિંહં નમામ્યમહમ્ ॥ ૬॥

પિતા ત્વં ચ સખા ભ્રાતા માતા નેતા ગુરુઃ સખા ।
સુહૃદશ્ચાત્મરૂપસ્ત્વં ત્વાં વિના નાસ્તિ મે સુખમ્ ॥ ૭॥

વાયુરગ્નિઃ કલા કાષ્ઠા પર્વતારણ્યરૂપધૃક્ ।
પશવસ્તરવઃ સર્વે વિગ્રહોન્યો ધૃતસ્ત્વયા ॥ ૮॥

દૈત્યદાનવનશાય વિગ્રહો ધૃત ઉચ્યતે ।
હિરણ્યકશિપુર્દૈત્યો બલવીર્યમદોત્કટઃ ॥ ૯॥

તસ્ય નાશાયતે રૂપં ધૃતં ચોગ્રં પરં મહત્ ।
ભવાન્ રૂપધરઃ શ્રેષ્ઠ નૃસિંહમતિવિગ્રહમ્ ॥ ૧૦॥

નેત્રેસ્થિતસ્તે દાવાગ્નિર્દૈત્યાનાં ભયકારણમ્ ।
શ્રીનૃસિંહં મહાવીરં દૈત્યદાનવમર્દનમ્ ॥ ૧૧॥

યોગેશં યોગપુરુષં લોકેશં યોગદાયકમ્ ।
સદાયોગીહૃદિસ્થાનં સેવિતં ચ વિરાજિતમ્ ॥ ૧૨॥

કોટિસૂર્યપ્રતીકાશં સ્વરૂપેણ વિશેષતઃ ।
કોટિ કન્દર્પલાવણ્યં વિગ્રહં વીરસિંહકમ્ ॥ ૧૩॥

દેવાધિદેવં સર્વજ્ઞં સર્વલોકહિતે રતમ્ ।
શૂરં શૂરપ્રતીકારં મહાકાલાગ્નિમર્દનમ્ ॥ ૧૪॥

જ્યોતિરૂપં નિરાભાસં નિરાન્તકં નિરામયમ્ ।
સ્વરૂપં સગુણં શાન્તં પરેશં પરતઃ પરમ્ ॥ ૧૫॥

નાગયજ્ઞોપવીતં ચ કૈવલ્યં મોક્ષદાયકમ્ ।
જ્ઞાનાનન્દપ્રતીકાશં જ્ઞાનમાર્ગં ચ શાશ્વતમ્ ॥ ૧૬॥

નિત્યાનિત્યં સદા સૌખ્યમાનન્દમતિસુન્દરમ્ ।
શઙ્ખઘ્નમખિલં તેજોવિગ્રહં મત્સ્યરૂપિણમ્ ॥ ૧૭॥

ભૂધરં કૂર્મદેહં તં હિરણ્યાક્ષવિમર્દનમ્ ।
વારાહપ્રતીમં ચોગ્રં નૃસિંહં દિવ્યતેજસમ્ ॥ ૧૮॥

જાહ્નવીહૃદિસમ્ભૂતં વામનં બલિમર્દનમ્ ।
જમદગ્નિસુતં વીરં ચાપમાર્ગણધારિણમ્ ॥ ૧૯॥

ઈશમીડ્યં મહાતેજં પરશ્વાયુધધારિણમ્ ।
પિતૃવાક્પાલિતં શૂરં શાશ્વતં ચિરમાયુષમ્ ॥ ૨૦॥

કૌસલ્યાગર્ભસમ્ભૂતં પરમાનન્દવિગ્રહમ્ ।
કોમલાઙ્ગં પરં શ્રેષ્ઠં જાનકીવલ્લભં વિભુમ્ ॥ ૨૧॥

શૃઙ્ખલાસ્ત્રોટિતાઃ સર્વાદેવાન્સર્વાન્સુખં દદૌ ।
પરં તીર્થં પરં જાપ્યં મમાત્માનન્દ ચેતસમ્ ॥ ૨૨॥

સર્વવેદાર્થસામર્થ્યં કેવલં તત્ત્વરૂપિણમ્ ।
શિવધ્યાનપરં મન્ત્રં વીરાસનપરં તપમ્ ॥ ૨૩॥

વિશ્વામિત્રમુનેઃ સેવ્યં ચિન્મયં ચ નિરઞ્જનમ્ ।
કરુણાસાગરં દેવં કાકુત્સ્થં જાનકીપ્રિયમ્ ॥ ૨૪॥

યજ્ઞરૂપં નિરાભાસં સત્યસન્ધં જિતારિણમ્ ।
તં નમામિ પરં મન્ત્રં રામકૃષ્ણં જગન્મયમ્ ॥ ૨૫॥

ચતુર્ભુજં રમાયુક્તં દેવક્યાતનુજં વિભુમ્ ।
પીતકૌશેયવસનં મેઘશ્યામં જનાર્દનમ્ ॥ ૨૬॥

શ્રીવત્સધારિણં દેવં કંસાસુરવિઘાતકમ્ ।
સહસ્રફણિશેષેણ નિત્યં સ્તુત્યાદિ સેવિતમ્ ॥ ૨૭॥

શ્રીધરં શ્રીકરં શ્રીશં શ્રીનિવાસં જગદ્ગુરુમ્ ।
બુદ્ધો બુદ્ધપ્રિયો બુદ્ધેર્બોધકો બુદ્ધિવન્દિતઃ ॥ ૨૮॥

કલ્કિ સૃજત્કલ્કિરૂપો કરુણાકરવત્સલઃ ।
શ્રીનૃસિંહો મહાવીરો દુષ્ટદાનવમર્દનઃ ॥ ૨૯॥

શ્રીનૃસિંહો નરૈસ્તુત્યો ગન્ધર્વૈઃ કિન્નરૈર્વરૈઃ ।
ૐ ક્ષ્રૌં શ્રીનૃસિંહ દિવ્યતેજ કોટિસૂર્ય પ્રતીકાશ
સર્વદુષ્ટાન્નાશય નાશય દારય દારય મારય મારય તાપય તાપય
દીપય દીપય વિદારય વિદારય સ્તમ્ભય સ્તમ્ભય મોહય મોહય
શાપય શાપય શૃઙ્ખલાસ્ત્રોટય ત્રોટય નાશય નાશય શોષય
શોષય ત્રાટય ત્રાટય હું હું હું હું હું હું હું હું હું હું હું (૧૧)
ક્રૌં ક્રૌં ક્રૌં (૩) શ્રીં શ્રીં શ્રીં શ્રીં શ્રીં (૫) સૌં સૌં સૌં (૩)
ક્ષ્રૌં ક્ષ્રૌં ક્ષ્રૌં (૩) ટં ટં (૨) ઠં ઠં ઠં ઠં (૪)
ફં ફં ફં ફં (૪) હ્રાં હ્રાં હ્રાં (૩) હ્રીં હ્રીં હ્રીં (૩)
શ્રીનૃસિંહ શીઘ્રં એહિ એહિ મમ રક્ષ રક્ષ

શત્રૂન્નાશય નાશય વ્યાલવ્યાઘ્રસિંહસર્પશાર્દુલાન્નાશય
નાશય સર્વદુષ્ટ દુર્જન શત્રુભયં નાશય નાશય મમ રક્ષ
રક્ષ સ્વાહા ॥

આયુતં યો જપેત્પૂર્વં હોતવ્યં સર્પિષા તથા ।
તત્તત્સિદ્ધિર્ભવેત્તસ્ય સાધકસ્ય ન સંશયઃ ॥ ૩૦॥

શ્રીનૃસિંહઃ કેશવઃ શૌરિર્ગોવિન્દો ગરુડધ્વજઃ ।
માધવશ્ચક્રપાણિશ્ચ વિશ્વક્સેનો હલાયુધઃ ॥ ૩૧॥

શાશ્વતઃ શઙ્કરઃ શૂલી હયગ્રીવોઽચ્યુતાગ્રજઃ ।
ડમરૂશૂલહસ્તશ્ચ નાગાભરણભૂષિતઃ ॥ ૩૨॥

કૃપયાનન્દ સમ્પૂર્ણો વૃષાઙ્કો વૃષભધ્વજઃ ।
નારાયણઃ પરં જ્યોતિઃ સુજ્યોતિર્જ્યોતિષાં પતિઃ ॥ ૩૩॥

સ્વાહાકારઃ સ્વધાકારો વષટ્કારઃ કૃપાકરઃ ।
નરરૂપોઽથ સિંહશ્ચ ષોડશાયુધધારણઃ ॥ ૩૪॥

શુક્તિકર્ણો વિરૂપાક્ષો નખાયુધવિભૂષણઃ ।
દંષ્ટ્રાકરાલમત્યુગ્રો શ્રીશઃ શ્રીધરશાશ્વતઃ ॥ ૩૫॥

નીલોઽનિલઃ સરોગ્નિશ્ચ શૂન્યમાકાશભૂતધૃક્ । (શૂન્યમાકાશભૂધૃતઃ)
ત્વં જ્યોતિર્બ્રહ્મ ઇન્દ્રશ્ચ વિછુરીશઃ પરો ગુરુઃ ॥ ૩૬॥

(ફલશ્રુતિઃ)
ઇત્યેતૈર્નામભિઃ સ્તોત્રં જપેન્નિત્યં પ્રયત્નતઃ ।
એકાન્તે નિર્જને દેશે શુચૌસ્છાને મનોહરે ॥ ૩૭॥

મણ્ડલં કારયેત્તત્ર પૂજયેન્નૃહરિં ગુરુમ્ ।
સ્તવરાજં જપેત્તત્ર પૂજા નાનાવિધા શુભાઃ ॥ ૩૮॥

સ્તવરાજં જપેન્નિત્યં ભાવયુક્તં સુધીમતા ।
અસ્મિન્જગત્રયે તસ્ય નાસાધ્યં નચ દુષ્કરમ્ ॥ ૩૯॥

ય ઇદં મન્ત્રરાજં તુ સર્વસિદ્ધિપ્રદં નૃણાં ।
રાત્રૌ યઃ સપ્તવારાણિ શ્મશાને મુક્તકેશિના ॥ ૪૦॥

અશ્વત્થો પરિસઙ્ગમ્ય દક્ષિણાભિમુખો ભવેત્ ।
સરિપૂન્નાશયેચ્છીઘ્રં નિશિ તત્ર ન સંશયઃ ॥ ૪૧॥

સ્છિત્વા પૂર્વમુખઃ સ્વસ્છો વિંશત્યાવર્ત્તનં ચરેત્ ।
પૂર્વોક્તે ન વિધાનેન શીઘ્રં રિપુવિનાશનમ્ ॥ ૪૨॥

ત્રિંશદાવર્તનં ગેહે સપ્તકં ત્રીણિસઙ્ખ્યયા ।
ભાવયુક્તો જિતેન્દ્રશ્ચ ભૂમિશા યીહવિષ્યભુક્ ॥ ૪૩॥

સમન્ત્રજપસિધ્યર્થં પ્રત્યક્ષો નૃહરિસ્તદા ।
આયુતં યો જપેત્પૂર્વં સમન્ત્રઃ સિદ્ધિદાયકઃ ॥ ૪૪॥

લક્ષ્મીસ્તસ્ય પ્રસન્ના ચ સદાતિષ્ઠતિ તદ્ગૃહે ।
રિપુણાં કુલનાશાય જપેદ્દ્વેયુતસઙ્ખ્યયા ॥ ૪૫॥

અઙ્ગુલિદ્વયકીલં તુ તુલસીમૂલકાષ્ઠજમ્ ।
નિઃક્ષિપ્તં યસ્ય ગેહે તુ પુત્રસ્તસ્ય ભવિષ્યતિ ॥ ૪૬॥

ય ઇદં સ્તવરાજં તુ નૃસિંહસિદ્ધિદાયકમ્ ।
શિવેન કથિતં સારં પાર્વત્યગ્રે વિશેષતઃ ॥ ૪૭॥

યો જપેચ્છૃણુયાદ્વાપિ ભાવયુક્તઃ સુધીમતા ।
સસામ્રાજ્યમવાપ્નોતિ સત્યં જાનિહિ પાર્વતિ ॥ ૪૮॥

શૌર્યવીર્યબલં તેજો પુત્રં પૌત્રં ચ શાશ્વતમ્ ।
સર્વભોગાન્પુમાન્શીઘ્રં નૃસિંહસ્ય પ્રસાદતઃ ॥ ૪૯॥

ય ઇદં જપતે નિત્યમિહ લોકે પરં સુખમ્ ।
અન્તે પ્રયાતિમોક્ષં ચ શિવસ્ય વચનં તથા ॥ ૫૦॥

ઇતિ શ્રીરુદ્રયામલે પરમગુહ્યસારે શિવપાર્વતીસંવાદે
શ્રીનૃસિંહસ્તવરાજસ્તોત્રં સમ્પૂર્ણમ્ ।

શ્રીલક્ષ્મીનૃસિંહાર્પણમસ્તુ ।
શુભં ભવતુ । શ્રીરસ્તુ ।

*Shri Nrisimhastavarajah*

pdf was typeset on February 10, 2024

Please send corrections to *sanskrit@cheerful.com*